कणित्वा, काणयित्वा, चिकणिषित्वा, चङ्कणित्वा ;
सङ्कण्य, सङ्काण्य, सञ्चिकणिष्य, सञ्चङ्कण्य ;
काणम् २, कणित्वा २, } काणम् २, काणयित्वा २, } चिकणिषम् २, चिकणिषित्वा २, } चङ्कणम् २ ; चङ्कणित्वा २; }
[1]कण्ठः, [2]कण्वः.

(158) "कण गतौ" (I-भ्वादिः-794. सक. सेट्. पर.) घटादिः ।
अस्य धातोः पूर्वोक्तकणतिवत् (157) शुद्धात्-सन्नन्तात्-यङन्ताच्च रूपाणि ज्ञेयानि । ण्यन्ते परम्—

| | |
|---|---|
| [3]कणकः-णिका, | ईषत्कणः-दुष्कणः-सुकणः ; |
| कणयिता-त्री, | कण्यमानः ; |
| [A]कणयन्-न्ती, | कणः; |
| कणयिष्यन्-न्ती-ती, | कणयितुम् ; |
| कणयमानः, | कणना ; |
| कणयिष्यमाणः, | कणनम् ; |
| कणितः-तवान्, | कणयित्वा ; |
| कणयिषुः, | [5]प्रकणय्य ; |
| कणयितव्यम्, | [6]कणम् २ ; } |
| कणनीयम्, | काणम् २ ; } |
| [4]कण्यम्, | काणयित्वा २ ; } |

इति रूपाणीति विशेषः । एतच्च गत्यर्थकत्वे एव (धातूनामनेकार्थकत्वात्)। अन्यार्थकत्वे तु काणयिता-इत्यादीनि रूपाण्येव, पूर्ववत् ।

---

1. औणादिके (द. उ. 5-6) ठप्रत्यये रूपम् । **कण्ठः**=गलः ।
2. औणादिके (द. उ. 8-125) क्वन् प्रत्यये रूपम् । **कण्वं**=पापम् । **कण्वः**=ऋषिः ।
3. घटादिपाठात् मित्त्वम् । 'मितां ह्रस्वः' (6-4-92) इति ह्रस्वः ।
4. 'अचो यत्' (3-1-97) इति यत् ।
5. 'ल्यपि लघुपूर्वात्' (6-4-56) इति णेरयादेशः ।
6. 'चिण्णमुलोर्दीर्घोऽन्यतरस्याम्' (6-4-93) इति णमुलि दीर्घो वा ।

A. 'अगन्मनीषः **कणयन्** मुकुन्दमस्मान् वियोगे रणयन् स दूतः ।
चणन् विषादं विशणन् विचिन्तां श्रणन् विमोहं श्रथितोऽस्तु सद्यः ॥' धा. का. 2.9.